अध्याय :- ३० Chapter-30

नारद उवाच ।।
ततः[1] स्कन्दः[2] सुरैः सार्धं श्वेतपर्वतमस्तकात् ।।
उत्तीर्य तारकं हन्तुं दक्षिणां स दिशं ययौ ।। १

ततः सरस्वतीतीरे यानि भूतानि नारद[3] ।।
ग्रहाश्चैवोपग्रहाश्चैव वेतालाः शाकिनी गणाः ।। २

उन्मादा ये ह्यपस्माराः पलादाश्च पिशाचकाः ।।
देवैस्तेषामाधिपत्ये सोऽभ्यषिच्यत पावकिः ।। ३

यथा ते नैव मर्यादां सत्यं जंति दुराशयाः ।।
एतैस्तस्मात्समाक्रांतः शरण्यं पावकिं व्रजेत् ।। ४

[4]अप्रकीर्णेन्द्रियं दांतं शुचिं नित्यमतंद्रितम् ।।
आस्तिकं स्कन्द भक्तं च वर्जयंति ग्रहादिकाः ।। ५

महेश्वरं च ये भक्ता भक्ता नारायणं च ये ।।
तेषां दर्शनमात्रेण नश्यंते ते विदूरतः ।। ६

ततः सर्वैः सुरैः सार्धं महीतरं ययौ गुहः ।।
तत्र देवैः प्रकथितं महीमाहात्म्यमुत्तमम् ।। ७

---

१ ब. तत
२ ब. स्कंद
३ ब. प्रतौ "भारत" इति स्यात् ।
४ ब. अविकीर्णं....

श्रुण्वन्विसिष्मिये स्कन्दः प्रणनाम च तां नदीम् ।।
ततो महीदक्षिणतस्तीरमाश्रित्य चिष्ठितम् ।। ८

प्रणाम्य शक्रप्रमुखा गुहं वचनमब्रुवन् ।।
अभिषिक्तं विना स्कन्द सेनापतिम कल्पषाम् ।। ९

न शर्म लभते सेना तस्मात्त्वमभिषेचय ।।
महीसागरसंभूतैः पुण्यैश्चापि शिवैर्जलैः ।। १०

अभिषेक्ष्यामहे त्वां च तत्र नो द्रष्टुमर्हसि ।।
यथा हस्तिपदे [1]सर्वपदांतर्भाव इष्यते ।। ११

सर्व तीर्थान्तरस्थानं तथार्णव महीजले ।।
सर्व भूतमयो यद्वत्त्र्यंबकः परिकीर्त्यते ।। १२

सर्व तीर्थमयस्तद्वन्महीसागर संगमः ।।
अर्धनारीश्वरं रूपं यथा रुद्रस्य सर्वद्रम् ।। १३

तथा महीसमुद्रस्य स्नानं सर्वफलप्रदम् ।।
येनात्र पितरः स्कन्द तर्पिता भक्ति भावतः ।। १४

---

१ ब. सर्वः

तेन सर्वेषु तीर्थेषु तर्पितानात्र संशयः ।।
न चैतद्बुद्धि मंतव्यं क्षारमेतज्जलं हि यत् ।। १५

यथा हि कटुतिक्तादि गवां[1] ग्रस्तं हि क्षीरदम् ।।
एवमेतत्त्रिवदं तोयं पितृणां तृप्तिदायकम् ।। १६

एवं ब्रुवत्सु देवेषु कपिलोऽपि मुनिर्जगौ ।।
सत्यमेतदुमापुत्र सर्वतीर्थमयी मही ।। १७

कर्दमो यस्त्वहमपि ज्ञात्वा तीर्थमहागुणान् ।।
सर्वां भुवं परित्यज्य कृत्वा ह्याश्रममास्थितः ।। १८

ततो महेश्वरः प्राह सत्यमेतत्सुरोदितम् ।।
ब्रह्माद्यास्तं तथा प्राहुरत्र भूयोऽप्यथो गुरुः ।। १९

अत्राभिषेकं ते वीर करिष्यामः समादिश ।।
ततः सुविस्मितस्तत्र स्नात्वा स्कन्दो महामनाः ।। २०

अभिषिञ्चन्तु मां देवा इति तान ब्रवीद्वचः ।।
ततोऽभिषेक संभारान्सर्वान्संभृत्य शास्त्रतः ।। २१

---

१ अ॰ गवां

जुहुवुर्मंत्रपूतेऽग्नौ चत्वारो मुख्य ऋत्विजः ।।
ब्रह्मा च कपिलो जीवो विश्वामित्रश्चतुर्थकः ।। २२

अन्ये च श्रुतश्रुतस्तत्र मुनयो वेदपारगाः ।।
तत्राद्भूतं महादेवो दर्शयामास भारत[1] ।। २३

यदग्निकुण्डमध्यस्थो लिंगमूर्तिर्व्यदश्यत ।।
अहमेवाग्निमध्यस्थो हविर्गृह्णामि नित्यशः ।। २४

एतत्संदर्शनार्थाय लिंगमूर्तिरभूद्विभुः ।।
तल्लिंगमतुलं देवा नमश्चक्रुर्मुदान्विताः ।। २५

सर्वपापापहं[2] पार्थ सर्वकामफलप्रदम् ।।
तत्र होमावसाने च दत्ते हिमवता शुभे ।। २६

दिव्यरत्नान्विते स्कन्दो निषण्णः[3] परमासने ।।
सर्व मंगल संभारैर्विधिमंत्रपुरस्कृतम् ।। २७

अभ्यषिंचंस्ततो देवाः कुमारं शंकरात्मजम् ।।
इंद्रो विष्णुर्महावीर्यो ब्रह्मरुद्रौ च फाल्गुन ।। २८

---

१ ब. भारतः
२ ब. पापपहं
३ ब. निषाणः

आदित्याद्या वसवो रुद्राः साध्याश्चैवाश्विनावुभौ ।। २९

विश्वे देवाश्च मरुतो गंधर्वाप्सरसस्तथा ।।
देवब्रह्मर्षयश्चैव वालखिल्या मरीचिपाः ।। ३०

विद्याधरा योगसिद्धाः पुलस्त्यपुलहादयः ।।
पितरः कश्यपोऽत्रिश्च मरीचिर्भृगुरंगिराः ।। ३१

दक्षोऽथ मनवो ये च ज्योतींषि ऋतवस्तथा ।।
मूर्तिमत्यश्च सरितो महीप्रभृति कास्तथा ।। ३२

लवणाद्याः समुद्राश्च प्रभासाद्याश्च तीर्थकाः ।।
पृथिवी द्यौर्दिशश्चैव पादपाः पर्वतास्तथा[1] ।। ३३

आदित्याद्या मातरश्च कुर्वंत्यो गृहमंगम् ।।
वासुकिप्रमुखा नागास्तथोभौ गरुडारुणौ ।। ३४

वरुणो धनदश्चैव यमः सानुचरस्तथा ।।
राक्षसो निर्ऋतिश्चैव भूतानि च पलाशनाः ।। ३५

---

१ अ॰ पार्वतास्तथा

धर्मो[१] बृहस्पतिश्चैव कपिलो गाधिनंदनः ॥
बहुलत्वाच्च ये नोक्ता विविधा देवतागणाः ॥ ३६

ते च सर्वे महीकूले [२]ह्यभ्यषिंचन्मुदा गुहम ॥
ततो महास्वनामुग्रां देवदैत्यादिदर्पहाम् ॥ ३७

ददौ पशुपतिस्तस्मै सर्वभूत महाचमूम् ॥
विष्णुर्ददौ वैजयंतीं मालां बलविवर्धिनीम्[३] ॥ ३८

उमा ददौ [४]चारजसी वापसी सूर्यसप्रभा[५] ॥
गंगा कमंडलुं दिव्यममृतोद्भवमुत्तमम् ॥ ३९

मही महानदी तस्य चाक्षमालां ससागरा ॥
ददौ मुदा कुमाराय दंडं चैव बृहस्पतिः ॥ ४०

गरुडोदयितं पुत्रं मयूरं चित्रबर्हिणम् ॥
अरुणास्ताम्रचूंड च प्रददौ चरणायुधम् ॥ ४१

छागं च वरुणो[६] राजा बलवीर्य समन्वितम् ॥
कृष्णाजिनं तथा ब्रह्मा ब्रह्मण्याय ददौ जयम् ॥ ४२

---

१ ब. धर्मो
२ ब. अभिषिं....
३ ब. प्रतौ "म" अधिकः पाठः ॥
४ ब. वा
५ ब. "भे"
६ ब. वारुणो

चतुरोऽनुचरांश्चैव महावीर्यान्बलोत्कटान् ।।
नंदिसेनं[1] लोहिताक्षं घण्यकर्णं च मानसान् ।। ४३

चतुर्थं चाप्यतिबलं ख्यातं कुसुममालिनम् ।।
ततः स्थाणुर्ददौ देवो महापारिषादं क्रतुम ।। ४४

स हि देवासुरे युद्धे दैत्यानां भीमकर्मणाम् ।।
जघान दोर्भ्या संक्रुद्ध प्रमुतानि चतुर्दश ।। ४५

यमः प्रादानुचरौ यमकालोपमौ तदा ।।
उन्मार्थं च प्रमार्थं च महावीर्यौ महाद्युती ।। ४६

सुभ्राजौ भास्करस्यैव यौ सदा चानुयायिनौ ।।
तौ सूर्यः कार्तिकेयाय ददौ पार्थ मुदान्वितः ।। ४७

कैलासशृङ्ग संकाशौ श्वेतमाल्यानुलेपनौ ।।
सौमोऽप्यनुचरौ प्रादान्मणिंसुमणिमेव च ।। ४८

ज्वालाजिह्वं ज्योतिर्षं च ददावग्निर्महाबलौ ।।
परिघं च बलुं चैव भीमं च सुमहाबलम् ।। ४९

---

१ ब. नंदित्सने

स्कंदाय त्रीननुचरान्ददौ विष्णुरुरुक्रमः ।।
उत्क्रोशं पंचकं चैव वज्रदण्डधरावुभौ ।। ५०

ददौ महेशपुत्राय वासवः परवीरहा ।।
तौ हि शत्रून्महेन्द्रस्य जघ्नतुः समरे बहून् ।। ५१

वर्धनं बंधनं चैव आयुर्वेद विशारदौ[१] ।।
स्कन्दाय ददतुः प्रीतावश्विनौ भरतर्षभ ।। ५२

बलं चातिबलं चैव महावक्रौ महाबलौ ।।
प्रददौ कार्तिकेयाय वायुश्चानुचरावुभौ ।। ५३

घसं चातिघसं वीरौ वरुणश्चैव ददौ प्रभुः ।।
सुवर्चसं महात्मानं तथैवाप्यति वर्चसम् ।। ५४

हिमवान्प्रददौ पार्थ साक्षाद्दौहित्रकाय वै ।।
कांचनं च ददौ मेरुर्मेघं मालिनमेव च ।। ५५

उच्छ्रितं चाति शृंगं च महापाषाणयोधिनौ[२] ।।
स्वाहेवाय ददौ प्रीतः[३] स विंध्यः पार्षदौ[४] शुभौ ।। ५६

---

१ ब. विशावदौ
२ ब. योधितं
३ ब. प्रीतौ
४ ब. दे

संग्रहं विग्रहं चैव समुद्रोऽपि गदाधरौ ।।
प्रददौ पार्षदौ वीरौ महीन्[1]द्या समन्वितः ।। ५७

उन्मादं पुष्पदंतं च शंकुकर्णं[2] तथैव च ।।
प्रददावग्निपुत्राय पार्वती शुभदर्शना ।। ५८

जयं महाजयं चैव ~~शुभ~~ ~~दर्शनम्~~ ++ नागौ ज्वलन सूनवे ।।
प्रददुर्बलिनां[4] श्रेष्ठौ सुपर्णः[5] पार्षदावुभौ ।। ५९

एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा ।।
सर्वे जगति ये मुख्या ददुः स्कंदाय पार्षदान् ।। ६०

नानावीर्यान्महावीर्यान्नानायुध विभूषणान् ।।
बहुलत्वान्न शक्यंते ~~संक~~ संख्यातुं ते च फाल्गुन ।। ६१

मातरश्च ददुस्तस्मै तदामातृगणान्प्रभो ।।
याभिर्व्याप्तास्त्रयो लोकाः[6] कल्याणीभिश्चराचराः ।। ६२

प्रभावती विशालाक्षी गोपाला[7] श्रोनसा तथा ।।
अप्सुजाता बृहदंडी कालिका बहुपुत्रका ।। ६३

---

१ ब. ना
२ ब. वर्ण
३ ब. नागा
४ ब. प्रददौ बलिनां इतिस्यात् ।
५ ब. सुवर्ण
६ ब. लोक्यः
७ ब. ली

भयंकरी च चक्रांगी तीर्थनेमिश्च माधवी ।।
गीतप्रिया अलाताक्षी चटुला शलभामुखी ।। ६४

विद्युज्जिह्या रुद्रकाली शतोलूखलमेखला ।।
शतघंटा किंकिणिका चक्राक्षी चत्वरालया ।। ६५

पूतना रोदना त्वामा[1] कोटरा मेघवाहिनी ।।
ऊर्ध्व वेणीधरा चैव जरायुर्जर्जरानना ।। ६६

खट[2] खेटी दहदहा तथा धमधमा जया ।।
बहुवेणी बहुशिरा बहुपादा बहुस्तनी ।। ६७

शतोलूकमुखी कृष्णा[3] कर्णप्रावरणा तथा ।।
शून्यालया धान्यवासा पशुदा धान्यदा सदा ।। ६८

एताश्चान्याश्च बहुवयश्च मातरो भरतर्षभ ।।
बहुलत्वादहं तासां न संख्यातुमि होत्सहे ।। ६९

वृक्षचत्वरवासिन्यश्चतुष्पथ निवेशनाः ।।
गृहस्मशानवासिन्यः शैल प्रस्त्रवणालयाः ।। ७०

---

१ ब. "वामा" पाठः ।
२ ब. वेट
३ ब. कृष्ण

नानाभरणवेषास्ता नानामूर्तिधरास्तथा ।।
नानाभाषायुधधराः[1] परिवव्रुस्तदा गुहम् ।। ७१

ततः स शुशुभे श्रीमान्गुहो गुह इवापरः ।।
सैनापत्ये चाभिषिक्तो देवैर्नानामुनीश्वरैः ।। ७२

ततः प्रणम्य सर्वांस्तानेकैक त्वेन पावकिः ।।
व्रियतां वर इत्याह भवब्रह्मपुरोगमान् ।। ७३

*२ इति श्री स्कांदे........कार्तिकेयस्य सेनानीत्वेऽभिषेक वर्णनं -
- नाम त्रिंशोऽध्यायः ।।

---

१ ब. कराः.....
* २ ब. इति श्री स्कंद पुराणे कुमारिकाखंडे कार्तिकेय सेनानित्वेभिषेकः
त्रिंशोऽध्यायः ।।